Gyanshauryam, International Scientific Refereed Research Journal
© 2022 GISRRJ | Volume 5 | Issue 5 | ISSN : 2582-0095

# वैयाकरण न्यायमते धात्वर्थ प्रतिपादनम्

डॉ. छगन लाल महोलिया
सह आचार्य – संस्कृत, श्री आर एल सहरिया राजकीय, स्नात्तकोत्तर महाविद्यालय, कालाडेरा, जयपुर।

**Article Info**
Volume 5, Issue 5
Page Number : 77-86
**Publication Issue :**
September-October-2022
**Article History**
Accepted : 01 Oct 2022
Published : 15 Oct 2022

**शोधसारांशः**– वैयाकरणानां मते तु व्यापारस्य प्राधान्याद् व्यापारमुख्यविशेषकः शाब्दबोधः भवति यथा "देवदत्त ओदनं पचति' इत्यादौ शाब्दबोधस्तु देवदत्ताभिन्नैककर्तृक ओदनाभिन्नैककर्मकविक्लित्त्यनुकूलो व्यापार इति शाब्दबोधो भवति। कर्तृप्रत्यय समभिव्याहारे व्यापारमुख्यविशेष्यकशाब्दबोधः फलञ्च व्यापारे विशेषणम्। एवमेव कर्मप्रत्ययसमभिव्याहारे 'यज्ञदतेन ग्रामो गम्यते' इत्यादौ फलविशेष्यकश्च शाब्दबोधः। यज्ञदत्ताभिन्नैककर्तृकगमनानुकूलव्यापारप्रयोज्य संयोगरूपफलाश्रयो ग्रामः।

**मुख्यशब्दाः**– वैयाकरणः न्यायः धात्वर्थ सूत्रम् भाष्यम् निपातः तत्पुरुषः।

धातुलक्षणम् - किं नाम धातुत्वम्? अत्र भगवान् पाणिनिः "भूवादयो धातवः" इति सूत्रं चकार । क्रियावाचिनो गणपठिता भ्वादयो धातुसंज्ञाः स्युरिति तदर्थः । उच्यते भवनं भूः क्रियासामान्यम् । वदन्तीति वादयः वदेरौणादिकइञ् इति भाष्यम् । यद्यपि 'वसिवपियजिराजिवजिसदिहनिवाशिवादिवारिभ्य इञ्' (उ. सू. ५६४) इत्यौणादिकसूत्रेण वर्ण्यन्तादि विहितस्तथापि बहुलग्रहणात् केवलादपि भविष्यतीति न्यासकारादयः । वस्तुतस्तु वदन्तीति वादयः इति भाष्यमर्थकनम् । "भुवो वादयः" इति विग्रहः तथा च क्रियावाचित्वं तावत्सूत्रारूढम्। निरनुबन्धानां शब्दिकरणानां भूप्रभृतीनां पाठसामर्थ्यात् पठितानामेव संज्ञेत्यनुमीयते। "सनाद्यन्ता धातव" इति सूत्रारम्भाच्च। अथवा भूरादिर्येषामिति विग्रहः। निपातनाद् वुगागमः महासंज्ञाकरणं तु दधति क्रियामिति धातव इत्यन्वर्थसंज्ञाविधानार्थम्। यद्वा भूश्च वाश्चेति द्वन्द्वः। आदिशब्दयोस्तु व्यवस्थाप्रकारतावाचिनोरेकशेषः। ततो भूवौ आदी येषामिति बहुव्रीहिः वा इत्यस्यादय इति तत्पुरूषः। तयोरेकशेषे स्वरभिन्नानामिति बहुव्रीहिशेषः। 'भुवो वादय' इति षष्ठीतत्पुरूषः। वाच्यवाचकभावश्च षष्ठ्यर्थः । सर्वथापि क्रियावाचिनो भ्वादय एव धातव इति स्थितम् ।

भूषणस्य प्रभाटीकाकाराः-"भूवादयो धातवः" इत्यत्र तु न क्रियासामान्यवाचकत्वं तस्यैव शक्तिग्राहकत्वेन तदर्थबोधात् प्राक् धातुपदवत्वेन भ्वादीनां बोधकत्वा संभवात्। अतस्तत्र क्रियावाचिन इत्यस्य क्रियात्वव्याप्यतत्तद्व्यापारत्वावच्छि न्नवाचिन इत्येवार्थः। तत्र धातुपदवत्त्वेन धातुपदशक्यतावच्छेदकतया क्रियात्वं जातिः। एवं क्रियानिरूपितशक्तावच्छेदकतया क्रियात्वं जातिः। एवं क्रियानिरूपितशक्तावच्छेदकतया पच्यादिनिष्ठं धातुत्वमपि जातिरूपमेव । तदुक्तम् -

जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्तिनीम्।
असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यते।।[1] इति।

पचति इत्यादौ फूत्कारादेरेकस्यापि पूर्वापरीभूतावयवत्वेनैव क्रियात्वम् तत्र तदभावेऽपि तदध्यासेन तदक्षतेः । तदुक्तं वाक्यपदीये -

एकदेशे समूहे वा व्यापाराणां पचादयः ।
स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिताः।।[2] इति।

फूत्कारादिनिरूपितं शक्तावच्छेदकं तु पचित्वादिरूपतत्तदानुपूर्वीरूपमेव । पचादिरपि सङ्केतसम्बन्धेन धातुपदवत्वेन रूपेण क्रियात्वप्रकारकसामान्यक्रि योपस्थापक एव।

नागेशस्तु-धातुत्वन्तु न शक्तावच्छेदकमतिप्रसक्तत्वात् धातुत्वाद्यजान तोऽपि बोधात् तादृशशक्तिग्रहस्य दृष्टफलाभावेनादृष्टमात्रार्थकत्वापत्तेश्चेत्याहुः ।

यद्वा फूत्काराद्यनेकव्यक्तिवृत्तिपचित्वादिजातिरेव क्रिया। व्यक्तिद्वारकञ्च तस्याः साध्यत्वम्। स्फोटवदस्याः क्रमवद्भिरपि क्रियाक्षणैरभिव्यक्तिः । फलस्यापि स्वजन व्यापारगतपौर्वापर्य्यारोपेण तथैव भानम्। अत एव तन्मात्रवाचकस्य धातुत्वसिद्धः । उक्तञ्च वाक्यपदीये -

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते।।[3] इति।

क्रमजन्मनाम्-क्रमेण-पौर्वाप\णोत्यत्तिमतां फूत्कारादिव्यापाराणां समूहो बुद्ध्या सङ्कलनात्मैकत्वबुद्ध्या समूहालम्बनात्मिकया वा प्रतिपत्तोऽभेदो यत्र समूहे स बुद्धिप्रकल्पितसमूह एव किया। अभेदश्च क्रियाणाम्। स च समूहो गुण भूतस्ततद्रूपेण भासमानैः समूहप्रकारीभूतैर्वावयवैः फूत्कारादिभिर्युक्तः क्रियेतिव्यप दिश्यते व्यहियते इत्यर्थः।

एतेन क्षणनश्वराणामवयवानां युगपदवस्थानासम्भवेन समूहः क्रियेत्यसङ्ग तमित्यपास्तम् बुद्ध्या प्रकल्पने बाधकामावत्। समूहेऽवयवगतपौर्वापर्य्यस्यारोपः स्वत एकत्वञ्चेत्यदोषः।

एवञ्चैकैकावयवेऽपि समूहरूपारोपादधिश्रयणाच्चेकैकक्रियादशायामपि पच तीत्यादिव्यवहारो न विरुद्ध्यते। आरोपे च तादृशवृद्धव्यवहार एव मानम्। तदुक्तं वाक्यपदीये।

यावत् सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते।
आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते।।[4] इति।

सिद्ध-भूतकालावच्छिन्नम् "अपाक्षीत्" इत्यादौ। असिद्धमभूतकालानव च्छिन्नम्-वर्तमानकालानवच्छिन्नं भविष्यत्कालावच्छिन्नञ्च यथा "पचति पक्ष्यति" इत्यादि स्थले। यावत्साध्यत्वेनाभिधीयते सा आश्रितक्रमरूपत्वात्-आश्रित मधिश्रयणाद्यवयवानां क्रमरूपं पौवापर्यं यया सा आश्रितक्रमरूपा तत्त्वात्। क्रियतेऽवयवानां क्रमेणोत्पत्त्या या सा क्रियेत्यन्वर्थसंज्ञेत्यर्थः। यत्र चास्त्यादि पौर्वापर्याभावस्तत्राप्यारोपेण रूढ्या व क्रियात्वं बोध्यम्। साध्यत्वनिरूपित प्रकारतावत् प्रतीति विशेष्यत्वं क्रियात्वं फलितम्। साध्यत्वम् निष्पाद्यत्वमेव तद्रूपेणैव बोधः। स्पष्टं चेदम् "उपपदमति" इत्यादौ भाष्ये। पचतीत्यादौ हि अधिश्रयणादिरधःश्रयणान्तो व्यापारकलापः क्रिया। अत एव तस्य युगपदसन्निकर्षान्न प्रत्यक्षता। किन्तु एकैकस्याधिश्रयणादिव्यापारस्य क्रमेणानुभवे सति मनसा सङ्कल्पना क्रियते तदुक्तं भाष्ये -

"क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिका'
"कालानुपाति यद्रूपन्तदस्तीति प्रतीयते। ।।[5] इति।

धातुभेदाः

धातूनां भेदविषये यथा शास्त्रेषु दृश्यन्ते गणान्तर्गताः केचन धातवः, केचन सूत्रेषुल्लिखिताः केचन प्रत्ययान्तोपात्ताश्च धातवः सन्ति। एतानेव भेदाना लक्ष्य जगदीशतर्कालङ्कारा अपि शब्दशक्तिप्रकाशिकायामाहुः

मूलधातुर्गणोक्तोऽसौ सूत्रैकदर्शितः।
योगलभ्यर्थको धातुः प्रत्यान्तः प्रकीर्तितः।।[6] इति।

तत्र गणोक्तो गणपठितः "गम्" "भू प्रभृतिः सौत्रम् सूत्रमात्रोपात्तः 'स्कन' जू प्रभृतिकः योगलभ्यार्थकः स्वावयवलभ्यार्थकस्य बोधकः पापि "पिपासादि" तितिक्षादिरपि सनर्थस्वरूपाद्यन्तर्भावन यौगिक एव। हिन्दोलार्दैलौकिकस्यापि सत्वाच्चतुर्विध एव धातुरिति वोपदेवः। सौत्रपदं यौगिकगणोक्ताभ्यामन्यतरपरमतो लौकिकस्य नाधिक्यमित्यन्ये।

सिद्धसाध्यभेदेन क्रिया द्विविधा। साध्यत्वम् क्रियान्तराकाङ्क्षानुत्थापकता ऽवच्छेदक रूपम्। तद्रूपवत्त्वमसत्वभूतत्वमिति भूषणकारः। एतदेवादाय वाक्यपदी येऽप्युक्तम् -

"असत्वभूतो भावश्च तिङपदैरभिधीयते ।।[7] इति।

तदभिन्नत्वम् सिद्धत्वम्। तदुक्तम्

आख्यातशब्दे भागाभ्यां साध्यसाधनरूपता।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः।।[8] इति।

आख्यातशब्दे पश्य मृगो धावति इत्यादौ भागाभ्याम् तिङन्ताभ्याम्, प्रकृतिप्रत्ययः भागाभ्यामिति विवरणोक्तमपव्याख्यानम् पचतीत्यत्रापि भागद्वयसत्वात्। साध्य साधनरूपता यथाक्रमं ग्राह्या तदुक्तं नागेशेन परमलघुमञ्जूषायाम् "अत्र केचित् सिद्धत्वम्-क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्त्वे सति कारकत्वेन क्रिया न्वयित्वे सति कारकान्तरान्वयायोग्यत्वम्। साध्यत्वं च क्रियान्तराकाङ्क्षानुन्त रान्वयायोग्यत्वम्। साध्यत्वं च क्रियान्तराकाक्षानुत्थापकतावच्छेदकं सत् कारकान्वययोग्यतावच्छेदकरूपवत्वम्। तत्र सिद्धत्वं पाक इत्यादौ घञादिवाच्यम्। साध्यत्वम् तु सर्वत्रैव धातुप्रतिपाद्यम्।

पचति करोति इत्यादि तिङन्तस्थले "किम् कः क्व" इत्यादिसाधनाकाङ्क्षासत्वेऽपि अन्यक्रियाविषयिका आकाङ्क्षा नोदेति इति साध्यरूपत्वं क्रियायाः, पाकः, कृतिः इत्यादौ अस्ति भवति, "नक्ष्यति" इत्यादिक्रियान्तराकाङ्क्षा जायते। तदुक्तं कौण्ड भट्टेन -

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः॥[9] इति।

किञ्च साध्यस्यैव क्रियात्वे क्रिया द्विविधा-सिद्धरूपा साध्यरूपा चेति विभागानुपपत्तिः। एवञ्च द्विविधक्रियासाधारणं क्रियात्वं किमति चेत्तत्रेदं गृहाण गुणत्वानाश्रयत्वे सति विभागासमवायिकारणत्वं क्रियात्वम्। विभागजविभागस्य संयोगजसंयोगस्य चाङ्गीकारे विभागजनकविभागे संयोगजनकसंयोगे चातिव्या प्तिवारणाय गुणात्वानाश्रयत्वे सति इति। विभागसंयोगयोश्च गुणत्वाश्रयतवा न्नातिव्याप्तिः। एतच्च सिद्धसाध्योभयक्रियासाधारणम्। व्यापारपदशक्यतावच्छे कधर्मवत्वं वा क्रियात्वम्। तच्च स्पन्दयत्नोभयनिष्ठम्।

न च धातुतः क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकवैजात्येनोपस्थितौ कृष्णं नमेच्चत्सुखं यायादित्यादौ, आकाङ्क्षाभावेनान्वयो न स्यादिति वाच्यम् । चेच्छब्दसमभिव्याहाराहेणाकाङ्क्षोत्थानात्। वस्तुतस्तु ज्ञाने साध्याकाङ्क्षावत् पच्या द्यर्थे साध्यतयाऽवगते किमस्य साधनम् इत्याकाङ्क्षोदयेन साधनाकाङ्क्षोत्थाप कतावच्छेदकरूपवत्वमेव साध्यत्वम् । उक्तञ्च हरिणा -

प्रयोगार्हेषु सिद्धः सन् मन्तव्योऽर्थो विशेषणैः ।
प्राक् च साधनसम्बन्धात् क्रिया नैवोपजायते॥[10] इति।

साधनं हि क्रियां निर्वतयति इति “सुट् कात्” इति सूत्रस्थभाष्यमप्येतत् कल्पेऽनुगुणमित्यवधेयम्।

क्रियेयं सकर्मकाकर्मकभेदेनापि द्विधा। सकर्मकत्वञ्च फलव्यधिकरणव्यापार वाचकत्वम्, फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम्। क्वचिन्तु फलांशाभा वादकर्मकत्वम्। उत्पन्नस्य सत्वस्य स्वरूपधारणरूपां सत्तामाचष्टेऽस्त्यादिरिति निरुक्तेश्च । भूषणे तु -

फलव्यापारयोरेकनिष्ठायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः॥[11] इति ।

"तयोर्धर्मिभेदे” इत्यनेन स्वार्थफलव्यधिकरणव्यापारवाचकत्वम्, स्वार्थ व्यापार व्यधिकरणफलवाचकत्वं वा सकर्मकत्वमुक्तम्।

स्वपदेन धातुर्ग्राह्यः। तथा च धातुवाच्यं यत्फलं तादृशफलव्यधिकरणो यो व्यापारस्तदवाचकत्वं धातोश्चेद् भवति तदा सोऽयं धातु: सकर्मक इत्युच्यते। भूप्रभृतावकर्मकेऽतिप्रसङ्गवारणाय स्वार्थफलव्यधिकरणेति व्यापारविशेषणम्। तथा च भूप्रभृतेरकर्मकधातोः स्वार्थफलसमानानिधकरणव्यापारवाचकत्वान्न सकर्मकत्वम्।

नागेशास्तु-शब्दशास्त्रीयकर्मकसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्। तदन न्वय्यर्थकत्वमकर्मकत्वम् इत्याहुः । तेन “अध्यासिताभूमय” इत्यादिसिद्धिः। अन्वयश्च पृथग् बुद्धेन संसर्गरूपः । अन्वयपदस्य तत्रैव व्युत्पत्तेः । तेन जीवतीत्यादौ न दोषः । तत्र प्राणादिरूपकर्मणो धारणार्थधात्वर्थात् पृथगबोदिति "सुपः आत्मनःक्यच्” इतिसूत्रे भाष्ये स्पष्टम्।

"अधिशीथासां कर्म" इत्यनेन भूमय इत्याधारस्य कर्मत्वम्। अयमेव पक्षः फलावच्छिन्नव्यापारबोधकत्वं सकर्मकत्वमिति वदद्भिराश्रितः फलस्य कर्मतायाः सर्वैरेवापगमात् फलान्वयार्थकत्वमस्य सकर्मकेषु सत्वात्। यदि चैकोपस्थिति विषयत्वान्नोक्तप्रकारः सम्भवतीति विभाव्यते तदा पृथक् शक्तिवादिमते निर्दुष्टत्वमेव, अवच्छिन्नपदस्य सम्बन्धपरत्वेन कर्मीभूतफलसम्बन्धिव्यापारार्थकत्वस्य सुस्थत्वात् । अकर्मकाणां फलार्थत्वानङ्गीकारेणातिव्याप्त्यव्याप्त्योरनवका- शादित्यवधेयम् ।

न्यायमते धात्वर्थविवेचनम्- तार्किकास्तु फलव्यापारौ धात्वर्थः लकाराणां कृतावेव शक्तिर्लाघवात्। न तु कर्त्तरि, कृतिमतः कर्तृत्वेन तत्र शक्तौ गौरवात्। प्रथमान्तपदेन तल्लाभाच्च । आख्यातार्थे धात्वर्थो विशेषणम् प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्रधान्यात्। प्रथमान्तार्थे आख्यातार्थे विशेषणम्। अनुकूलत्वमाश्रायत्वं संसर्गः। तथा च चैत्रः पचतीत्यादौ विक्लित्यनुकूलव्यापारानुकूलकृतिमांश्चैत्र इति बोधः। “रथो गच्छति” इत्यादौ रथस्याचेतनत्वात् यत्नशून्यत्वेन व्यापारे आश्रयत्वे वा आख्यातार्थस्य लक्षणा। "लः कर्मणि" इति सूत्रे कर्तृकर्मपदे भावप्रधाने तथा च कर्तृत्वं कृतिः, कर्मत्वं,फलम्, तयोः शक्तौ सूत्रस्वरसः । कर्मप्रत्ययान्ते पच्यते ओदनो देवदत्तेनेत्यादौ देवदत्तनिष्ठकृतिजन्यव्यापारजन्यविक्लितिमान् ओदन इति बोधः। "पश्य मृगो धावति” इत्यत्र अन्यदेशसंयोगानुकूलकृतिमन्मृगकर्मकं प्रेरणाविषयीभूतं यदर्शनं तदनुकूलकृतिमाँस्त्वमिति बोधः। एवं प्रथमान्तकर्तृवाचकपदसमभिव्या हारे प्रायः प्रथमान्तार्थविशेष्यक एव क्वचित्तु पश्य मृगो धावतीत्याद्येक वाक्यताऽनुरोधात् तिङर्थभावनाविशेष्यकोऽपि सः।

नैयायिकास्तु कर्मतासम्बन्धेनतिर्थभावनाप्रकारकबोधे धातुजन्यभावनोप स्थितेस्तदिति सममेव।

तथाचोक्तस्थले आधेयतासम्बन्धेन मृगविशिष्टधावनाऽनुकूलकृतेः कर्मतया दृश्यर्थेऽन्वये मृगनिष्ठाधावनानुकूलाकृतिस्तत्कर्मदर्शनाश्रयस्त्वमिति वाक्यार्थबोधः । धावनविशिष्टकृतौ च बोधितकर्मत्वस्य, “सविशेषणे हि" इति न्यायाद्धावने पर्यवसानञ्च प्रतिपिपादयिषितार्थस्यापि लाभः। नापि मृगपदोत्तरं द्वितीयापत्तिः प्रथमान्तार्थकर्तृविशिष्टा पाककृतिवर्तमानभावनायिका इति बोधात् तत्राप्येक वाक्यत्वाक्षतिः। प्रकृतिप्रत्ययार्थयोरिति न्यायाऽविरोधेनैव भाष्यकारोक्तपदैकवाक्यता न्यायनये सूपपादा।

वैयाकरणभूषणसारमते धात्वर्थ विमर्शः- वैयाकरणतन्त्रे वाक्यस्फोटस्यैव प्राधान्यम्। तदर्थ सिद्धान्तभूतवाक्यस्फोटान्तर्गतसकलशब्दकारणीभूतधात्वर्थस्य तिङर्थस्य च विचारं पूर्व वितनुते।

सुप्तिङ्समूहरूपे वाक्ये धात्वर्थस्य प्राधान्यमवलोक्यते, इत्यादि वाक्यश्रवणेनापि धातोः प्राधान्यं तदर्थस्य च प्राधान्यमङ्गीक्रियते। अत एव वैयाकरणभूषणसारे कौण्डभट्टेन सर्वप्रधानं धात्वर्थं निरूपयन्नाह -

**"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**
**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्।।**[12]

तिङन्तस्थले पचति इत्यादौ धातोः पचादेः फलव्यापारौ अर्थौ भवतः । तिप्रत्ययानामर्थः आश्रयः। अत एव कर्तृकर्मसंख्याकाला इत्यस्ति तदर्थः । फलव्यापारयोर्थयोर्व्यापाररूपार्थः प्रधानो भवति। तिङर्थः कर्तृ-कर्म-संख्या-काला व्यापारे विशेषणतां गच्छन्ति इति कारिकायाः संक्षिप्तः सरलार्थः । व्यापारः भावना नामिका साध्यत्वेन अभिधीयमाना क्रियेत्युच्यते। फलञ्च विक्लित्यादि भवति। आश्रये तु तिङ्ः स्मृताः इत्यस्यायमाशयः तप्तोदकप्रस्वेदन कृतप्रशिथिलावयवकत्वात्मकं मृदुविशदत्वं विक्लित्तिः, तदनुकूलव्यापारः अधिश्रय णोदकासेचनैधोपर्षणप्रज्वलनादिरूप इति 'कारके' इत्यादि सूत्रभाष्ये स्पष्टम् ।

तिङर्थः फलाश्रयः कर्म भवति व्यापाराश्रयश्च कर्ता भवति। फलव्यापारयोरर्थयो र्धातुलभ्यत्वात् न तिङः फलव्यापारौ अर्थौ भवतः तिङर्थेषु कर्तृ-कर्म-संख्या-कालेषु कर्तृकर्मणी फलव्यापारयोः विशेषणे भवतः। संख्या कर्तृप्रत्ययस्थले कर्तरि विशेषणं भवति कर्मप्रत्ययस्थले च कर्मणि विशेषणं भवति । इत्थमाख्यातार्थसंख्याप्रकारकबोधं प्रति आख्यातजन्यकर्तृकर्मोपस्थितिः हेतुः भवतीति कार्यकारणभावः स्वीक्रियते।

वैयाकरणानां मते तु व्यापारस्य प्राधान्याद् व्यापारमुख्यविशेषक: शाब्दबोधः भवति यथा "देवदत्त ओदनं पचति' इत्यादौ शाब्दबोधस्तु देवदत्ताभिन्नैककर्तृक ओदनाभिन्नैककर्मकविक्लित्त्यनुकूलो व्यापार इति शाब्दबोधो भवति। कर्तृप्रत्यय समभिव्याहारे व्यापारमुख्यविशेष्यकशाब्दबोधः फलञ्च व्यापारे विशेषणम्। एवमेव कर्मप्रत्ययसमभिव्याहारे 'यज्ञदतेन ग्रामो गम्यते' इत्यादौ फलविशेष्यकश्च शाब्दबोधः। यज्ञदत्ताभिन्नैककर्तृकगमनानुकूलव्यापारप्रयोज्य संयोगरूपफलाश्रयो ग्रामः।

अत्र मीमांसकेषु मण्डनमिश्रादयः कथयन्ति यत् धात्वर्थः केवलं फलमस्ति फलमात्रं धात्वर्थः अनुकूलव्यापारस्तु आख्यातार्थः । अन्ये मीमांसकास्तु- व्यापारमात्रं धात्वर्थः फलं च द्वितीयार्थ इति। नव्यमीमांसकाश्च फलव्यापारौ धात्वर्थः । उभयत्र खण्डश एका शक्तिः। तिङः प्रत्यार्थव्यापारः भवति। आश्रयस्य कर्तुः कर्मणः वा लक्षणयाक्षेपेण उपस्थितिर्भवति। शाब्दबोधे वैयाकरणमीमांसकयोः सिद्धान्ते न कोऽपि भेदः।

नैयायिकास्तु फलव्यापारौ धात्वर्थः इत्यङ्गीकुर्वन्ति। तिङर्थः कृतिरस्ति इति वदन्ति। शाब्दबोधे च प्रथमान्तपदस्य प्रधानता भवति। "देवदत्तः ओदनं पचति" इति वाक्यस्य ओदनकर्मकविक्लित्यनुकूलव्यापारानुकूलकृतिमान् देवदत्त इति शाब्दबोधो भवति।

किन्तु वैयाकरणा मीमांसकाश्च नैयायिकोक्तमतं नाङ्गीकुर्वन्ति यतोहि व्यापारस्य तिङर्थत्वे "लः कर्मणि च भावे चाकर्मकेभ्यः" इतिसूत्रात् विरोधो जायते। अस्मिन् सूत्रे 'कर्तरि कृत्' इत्यतः कर्तरि इत्यस्यानुवृत्तिरायाति। तेन लकारादिस्थाने आगतास्तिप्रत्ययाः कर्तरि कर्मणि चार्थे विधीयन्ते। अतस्तिङ् प्रत्ययार्थः कर्ता कर्म एवास्ति। यदि मीमांसकाः "लः कर्मणि' इति सूत्रे कर्तृकर्मपदयोः कर्तृत्वं चार्थं स्वीकुर्वन्ति कर्तृत्वं कृतिः कर्मत्वं च फलमेव अर्थः स्यादत एतन्मतं न समीचीनम्। यतो हि फलव्यापारयोः धातुलभ्यत्वेन पुनः लकारस्य तत्र शक्तिकल्पनमनुचितम्। यद्यत्र धात्वर्थो व्यापारो न स्वीक्रियेत तदा कृदन्तस्थले कृत्प्रत्ययानामपि कर्तृकर्माद्याः न सिद्धेरन्। यद्युच्येत कृतामिवा ख्यातानामपि कर्तृवाच्यत्वमस्तु भावनायैवाक्षेपेण कृदादिवत् प्रतीतिसम्भवे वाच्यत्वं मास्तु तथा सति प्राधान्यं भावनाया न स्यात्। अत आख्यातस्य अर्थो भावनैवास्ति इति चेन्न। 'घटमानयेत्यादौ' यथाक्षिप्तव्यक्तेः प्राधान्यं भवति तथैवाश्रयेऽपि स्यात् । 'पचति' इत्यादौ पाकं करोति इति भावनाया विवरणादाख्यातार्थो भावनैवास्ति इत्यपि कथनं न युक्तम् किञ्च 'पचति देवदत्तः' इत्यादावभेदान्वया बोधादाख्यातस्य कर्ता एवार्थारस्तीति वक्तव्यम्। यदि समानविभक्तिकत्वाभावे अभेदबोधः। 'पचति देवदत्तः' इत्यत्र न भविष्यतीति मीमांसकाः कथयेयुः। तदा 'सोमेन यजेत' इत्यादावपि मीमांसकैः प्रतिपादितो- ऽभेदान्वयबोधो न स्यात्। लक्षणया कर्तुरुक्तत्वात् समानाधिकरण्यमिति वाच्यं तथासति पिङ्गाक्षादिशब्दानां द्रव्यंवाचित्वं न सिद्ध्येत्। एवञ्च 'अरुणया पिगक्ष्यैकहायन्या सोमं क्रीणाति' इति वाक्ये द्रव्याऽनुक्तेरारुण्यस्य स्ववाक्योपात्तद्रव्ये एवाऽन्वयप्रतिपादकाऽरुणाधिकरणोच्छेदापत्तिः स्यात्।

नैयायिकाः आख्यातार्थसंख्यायाः प्रथमान्तार्थ एव स्वीकुर्वन्ति। तेन अन्वयादाख्यातार्थसंख्याप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरिति कार्यकारण भावो भवति। 'तेन चन्द्र इव मुखं दृश्यते', 'देवदत्तो भुक्त्वा व्रजति' इत्यादौ चन्द्रक्त्वाऽर्थयोराख्यातार्थानन्वयादितराऽविशेषणत्वघटित्वमिति विशेषणदानाद् गौरवं स्यात्।

इत्थं वैयाकरणा आख्यातार्थः कर्तृ-कर्म-संख्याकाला इति स्वमतं स्थापयन्ति एतेष्वर्थेषु कालरूपः अर्थः व्यापारे विशेषणं भवति। संख्यावत् कालस्य कर्तृकर्मणोरन्वयो भवितुं नार्हति यतोहि कर्तृकर्मणोरन्वये सति अतीतव्यापारकर्तरि पचतीति स्यात् 'अपाक्षीत्' इति न स्यात्।

पाकानारम्भदशायामन्वयो भवितुमर्हति। फलस्यानुत्पत्तौ व्यापारसत्वे 'पचति' इति न स्यात्। न चैवमपि फलेऽन्वयः कुतो नेति वाच्यम् फलानुत्पत्तिदशायां व्यापारसत्त्वे पचतीत्यनापत्तेः पश्यतीत्यापत्तेश्च।

व्यापारे आख्यातार्थकालाऽन्वये दूषणमाशङ्कय कथ्यते न च कालस्य व्यापारान्वये आमवातजडीकृतकलेवरस्य उत्थानानुकूलयत्नरूपव्यापारस्य वर्तमानत्वेन विषयाबाधाद् 'उत्तिष्ठति' इति प्रयोगापत्तिरिति वाच्यम्, परयत्नस्याज्ञानादप्रयोगात्, यत्किञ्चिच्छरीरावयवक्रियया यत्नानुमितौ तु 'अयमुत्ति ष्ठति शक्त्यभावात् फलन्तु न जायते' इति लोकप्रतीतेरिष्टत्वात्। एवञ्च तिर्थो विशेषणमेव, भावनैन प्रधानम्।

यद्यपि "प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमन्यत्र दृष्टं, तथाऽपि" "भावप्रधानमाख्यातं सत्वप्रधानानि नामानि" (नि.अ.१ ख.१) इति निरुक्तवचनाद् भूवादिसूत्रादिस्थक्रियाप्राधान्यबोधकभाष्याच्च शाब्दबोधे धात्वर्थभावनाप्राधान्यं स्वीक्रियते।

कर्तृकर्मणोराख्यातार्थबोधकत्वे अर्थात् वैयाकरणानां मते आख्यातस्य कर्तरि कर्मणि च शक्तिरङ्गीक्रियते तेन पचतीत्यत्रोभयबोधापत्तिः। ननु "सकृदुच्चरितः शब्दः सकृदर्थ गमयति" इति रीत्यात्र कर्तृमात्रस्यैव बोधो भवति न तु कर्मणि तत्र किं कारणमिति जिज्ञासायामुच्यते ग्रन्थकारेण

**फलव्यापारयोस्तत्र फले तङ्यचिणादयः।**
**व्यापारे शपश्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम्॥[13] इति।**

फलव्यापारयोरत्रेयं कारिकोद्धृतास्ति। अस्यारयमाशयः धातुरुपस्थाप्योः फलव्यापारयोरर्थयोः कर्मप्रत्ययसमभिव्याहारे फलमुख्यविशेष्यक: शाब्दबोधो भवति । व्यापारस्तु प्रकारतया फले विशेषणम्। तङ्यचिणादयः कर्मवाचकाः प्रत्ययास्तेषामाश्रयतया फलेऽन्वयः। अतः तङ्यचिणादयः फलेऽन्वयद्योतकाः फलान्वयाश्रयस्य कर्मत्वात् कर्मद्योतकाः। द्योतकतारूपा या व्यञ्जनाशक्तिः तया कर्मप्रतिपादकाः। द्योतकत्वञ्च स्वसमभिव्याहृतपदनिष्ठशक्तिव्यञ्जकत्वम् इति। एवमेव कर्तृप्रत्यया शप्श्नमाद्यास्तु व्यापारे आश्रयतयाऽन्वयद्योतकाः । व्यापारान्वयाश्रयस्य कर्तृत्वात् व्यापारान्वयद्योतकाः कर्तृद्योतकाः। अतस्तङादि कर्मप्रत्ययसमभिव्याहारे कर्मार्थस्यैव, शप्रश्नमादि कर्तृप्रत्ययसमभिव्याहारे कर्बर्थस्यैव बोधः, तत्तत्प्रत्ययसमभिव्याहारे आश्रयतया तत्तदर्थस्यैव द्योतकत्वात्।

अतः शबादयः प्रत्ययाः कर्तुः द्योतकाः भवन्ति। इत्थं क्वापि कर्मणोरर्थस्य प्राधान्येन प्रतीतिः कथञ्चित् कर्तुः अर्थस्य प्राधान्येन प्रतीतिः भवतीति प्रतिपादितम् । यदि कारिकोक्तमर्थं वयं स्वीकुर्मः तदा "क्रमादमुं नारद इत्यबाधि सः" इत्यादौ फलान्वयाश्रयद्योतकस्य चिण: समभिव्याहारे कर्मद्योतकत्वमस्तु। 'पच्यते ओदनः स्वयमेव' इत्यत्रापि तङ्यक्समभिव्याहारे कर्मद्योतकत्वमस्तु तेन इत्यादौ व्यभिचारो भवेत्। यतोहि कर्मणः कर्तृत्वविवक्षायां कर्तरि लकारे सति, "कर्मवत् कर्मणा तुल्यक्रियः" (पा. सू. ३/१/८७) इत्यतिदेशेन यगात्मनेपदचिण चिण्वदिटामतिदेशाद्यगादिसत्वेऽपि कर्तुरेव बोधाद् व्यापारे एवाऽऽश्रयान्वयाच्च । कारणं यत् अबोध इत्यत्र 'बुध' ज्ञाने धातोः कर्तरि लुङ्लकारे, क्तप्रत्यये कृते सति "च्लि लुङि" इतिसूत्रेण लुङि परे धातोः च्लिप्रत्यये "दीपजनबुधपूरि तायिप्यायिभ्योऽन्यतरस्याम्" इति शास्त्रेण च्लेः स्थाने चिणादेशे कृते "चिणो लुक इत्यनेन तकारस्य लोपो भवति। अत्रापि नाऽऽश्रयस्य फलेऽन्वयः। किन्तु व्यापार एवेत्यत आह -

**उत्सर्गोऽयं कर्मकर्तृविषयादौ विपर्ययात्**
**तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम्॥[14]**

कर्मकर्तृविषयादौ पच्यत ओदनः स्वयमेवेत्यादौ, आदिपदात्क्रमादमुं नारद इत्यबोधि स इत्यादौ च विपर्ययात् तङादिः कर्मद्योतक: शबादिश्च कर्तृद्योतक इत्येवं रूपः पूर्वोक्तोऽर्थः, उत्सर्गः उत्सृज्यते क्वचित्त्यज्यते इति व्युत्पत्त्या सामान्यभूतो बहुषूदाहरणेषु तथा सत्त्वात्प्रायिको नतु सार्वत्रिक इत्यर्थः। तस्मात् पूर्वोक्तार्थस्यासार्वत्रिकत्वात् अननुगतमपि व्युत्पत्त्यनुसारित्वादुचितमिति यावत्। यथागम-शास्त्रानुसारेणैव द्योतकत्वं स्वीकर्त्तव्यमिति भावः । एतदेव शाब्दबोधवर्णनेन स्पष्टयितुं शक्यते। अत्र ह्येकौदनाभिन्नाश्रयकपाकानुकूलो व्यापार इति बोधः । क्रमादित्यादिपदग्राह्यम् । नारद इत्यबोधीत्यस्य शाब्दबोधः प्रादर्शि। सामान्य विशेषज्ञानपूर्वकज्ञानम् अर्थात् पूर्वं त्विषां चय इति, ततः शरीरीति, ततः पुमानिति ततो नारद इति क्रमिकज्ञानमध्ये पूर्वं पूर्व सामान्यज्ञानमुत्तरोत्तरं च विशेषज्ञानमिति बोध्यम्। एकनारदविषयकज्ञानानुकूलः कृष्णाभिन्नाश्रयकोऽतीतो व्यापार इति बोधः । अत्र निपातेनेति शब्देन कर्मणोऽभिहितत्वान्न नारदशब्दोत्तरं द्वितीया। भट्टनागेशमते तु 'नारदः' इत्याकरकं यज्ज्ञानं तदनुकूल इत्यादिर्बोधोऽवगन्तव्यः । तत्र नारद इति प्रथमान्तस्याप्रातिपदिकत्वान्न द्वितीयाप्राप्तिरपि। क्वचिन्निपातेनेति तु ते नानुमन्यते। यथोचितमिति। सकर्मकधातुसमभिव्याहृतभावसाधारणविसेधिविधे यचिण्यगादि कर्मद्योतकमर्थात् व्यापारव्यधिकरणफलवाचको यो धातुस्तत्स मभिव्याहृतं भावकर्तृसाधारणभावकर्मणोः "सार्वधातुके यगि" त्यादिसूत्रविहितं यच्चिण्यगादिकं तद्द्योतकमिति भावः ।

**व्यापारो भावना सैवोत्पादना सैव च क्रिया।**
**कृञोऽकर्मकतापत्ते हि यत्नोऽर्थ इष्यते॥[15] इति।**

ननु भावना धातुवाच्या तस्या धातुवाच्यत्वे प्रकृतिप्रत्ययाविति न्यायेना प्राधान्यापत्तेरिति प्राभाकाराः । अत्रोच्यते-पचति पाकमुत्पादयति, पाकानुकूला भावना तादृश्युत्पादनेति विवरणदर्शनात् विक्लियमाणस्य धातोर्वाचकता युक्ता। व्यापारपदं च फूत्कारादीनामयत्नानामपि फूत्कारत्वादिरूपेण वाच्यतां ध्वनयितुमुक्तम् । अत एव पचतीत्यत्र अधःसन्पापनत्वफुत्कारत्वचूल्ल्युपरिधारणत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः ।

यद्यपि फलानुकूलो व्यापारो धात्वर्थ इति नैयायिका मन्यन्ते तथाऽपि नासौ तन्मते भावनाशब्दव्यवहार्यः । 'व्यापारो भावना सैव' इत्यादिपूर्वार्द्धस्य यो गुणभूतैरवयवैः' इत्याद्युक्तलक्षणलक्षितोऽर्थः, तद्वाचकव्यापारपदं भावनादिपदैर्विक्लि यते। विक्लियमाणस्य विवरणसमानार्थकत्वेन धातो वनावाचकत्वसिद्धिरित्यर्थः । तत्रोद्देश्यविधेययोरैक्यमापादयतः सर्वनाम्नः पर्यायेणान्यतरलिङ्गकत्वस्य 'शैत्यं हि यत् सा प्रकृतिर्जलस्य इत्यादिबहुषु स्थलेषु दर्शनात्तत्र सा' इति स्त्रीलिङ्गनिर्देशानुपपत्तिः। पुल्लिंगत्वेऽपि, सोऽचि लोपे चेत् (पा.सू.६/१/१३४) इति लोपेन साधुत्वाच्च।

न च पचति पाकं करोतीति यत्नार्थककरोतिना विवरणाद् यत्न एवाऽऽख्यातार्थ इति वाच्यम्। रथो गमनं करोति, बीजादिना अङ्कुरः कृत इति दर्शनात्कृञो यत्नार्थकताया असिद्धेः। अत्रेदमवधेयम्-वैयाकरणमतेऽपि पचत्यादेः फूत्कारादिव्यापारे व्यापारत्वेनैव शक्तिः, व्यापारसामान्यर्थककृञा विवरणात्। एव ञ्च व्यापारत्वेन कृतेरपि सङ्ग्रहात् 'मत्तो भूतं न तु मया कृतम्' इति उपपद्यते इति तत्र तत्रोक्तं सङ्गच्छते। तत्तद्रूपेण क्वचिद् बोधस्तु पचत्यादीनां तत्तद्रूपावच्छिन्नो लक्षणयोपपाद्यः। शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा इत्यभियुक्तोक्तेः। अत एव वाक्यार्थप्रदर्शनाऽवसरे विक्लित्त्यनुकूलो व्यापारः, ज्ञानाऽनुकूलो व्यापार इति व्यापारसामान्यार्थकव्यापारपदेन स्वोत्कीर्त्तितस्य सङ्गतिरिति।

कृञोऽकर्मकतापत्तेरिति कारिकोत्तरार्धमवतारयितुं भूमिकामारचयति। किञ्च भावनाया निरूपितवाच्यत्वाभावे तिनिरूपितवाच्यत्वाभावे ततश्च फलमात्रस्य धात्वर्थत्वे पर्यवसन्ने स्वजनकव्यापारव्यधिकरणधात्वर्थफलाश्रयत्वं, धात्वर्थ फलाश्रयत्वमेव वा कर्मत्वं वक्तव्यम्। अत्र स्वपदेन फलं ग्राह्यम्। एवं च उत्पत्त्यर्थकाद् भूधातोस्तदनुकूलव्यापारवाचके णिच्प्रत्यये कृते घटं भावयतीत्यत्र उत्पत्तिरूपधात्वर्थफलाश्रयत्वेन कर्मत्वाद्यथा घटपदोत्तरं द्वितीया भवति तद्वद् घटो भवतीत्यत्रापि उत्पत्तिरूपधात्वर्थफलाश्रयत्वेन कर्मत्वाद् घटपदोत्तरं द्वितीयापत्तिः स्यात्। अत्रेदं बोध्यम्। णिजन्तस्थले स्वजनकेत्यादिप्रथमं कर्मलक्षणं, द्वितीयं तु शुद्धे णिजन्ते चेति। घटो भवतीत्यत्र घटपदोत्तरं द्वितीयापत्तिं वारयितुं शङ्कते। किन्तु घटो भवतीत्यत्र घटस्य कर्तृत्वेन प्रतीतेर्घटस्योत्पत्तिरूपफलाश्रयत्वेऽपि परया कर्तृसंज्ञया कर्मसंज्ञाया बाधान्न द्वितीयापत्तिः। यदुक्तं घटस्य कर्तृत्वं तन्न संभवति अतः उच्यते चेतनाचेतनैतदुभयवृतिकर्तृत्वलक्षणस्य त्वया वक्तुमशक्यतया घटस्य कर्तृत्वाभावादुर्निवारा द्वितीया। यदि तत्तद्धात्वर्थफलानुकूलकृत्याश्रयत्वं कर्तृत्वमुच्यते तर्हि प्रयत्नापरपर्यायायाः कृतेश्चेतनमात्रनिष्ठधर्मत्वेनाचेतने तदभावेन घटोऽस्तीत्यादावव्याप्तिः। प्रकृतधातूपात्तक्रियान्वययोग्यकारकसमुदायप्रवर्तकत्वं तदिति चेत् स्थाली पचति असिश्छिनत्तीत्यादौ स्थाल्यादेरचेतनस्य कारकचक्रप्रवर्तकत्वाभावेनाव्याप्तिरेव। घटस्याचेतनत्वात्कृत्याश्रयत्वस्य कारक चक्रप्रयोक्तृत्वस्य चाभाव इतिभावः। तथा च कृत्यादिमत एव कर्तृसंज्ञाया उक्तत्वात्कृत्याद्यभावे कर्तृसंज्ञाप्राप्त्यभावेन कर्मसंज्ञाया अनपवादत्वाद्द्वितीयापत्तिर्दु वारा। मम मते धातूपात्तव्यापाराश्रयत्वेन कर्तृत्वान्न द्वितीया किन्तु प्रथमैवेति न दोषः। एवं धातोर्व्यापारावाचकत्ववादिनैयायिकमतं निराकृत्य फलं धात्वर्थः, व्यापारः प्रत्ययार्थ इति वादिनं मीमांसकं प्रत्याचष्टे धात्वर्थानुकूलव्यापाराश्रयत्वस्य च कारकमात्रातिव्यापकत्वात्।

घटनिष्ठधात्वर्थफलानुकूलव्यापारस्यैव स्वातन्त्र्यविवक्षणेन कर्तृसंज्ञाया अपरि हार्यत्वादुच्यते अपि च भावनाया अवाच्यत्वे घातूनां सकर्मकत्वाकर्मकत्व विभाग उच्छिन्नः स्यात्। अर्थात् यदि व्यापाररूपा भावना धातुवाच्या न स्यात्तर्हि सकर्मकोऽयं धातुरयं चाकर्मक इत्येवंभागः सर्वथा दुरुपपाद इत्यर्थः । स्वार्थफल व्यधिकरणव्यापारवाचकत्वं, स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा सकर्मकत्वं भावनाया वाच्यत्वमन्तरेणासम्भवि। अन्यमत्वं सकर्मकत्वमित्यपि न, एकस्यैवार्थभेदेन सकर्मकत्वाकर्मकत्वदर्शनात्। एवञ्च फलमात्रस्य धात्वार्थत्वे यतीप्रयत्ने इतिवत् सर्वेषामकर्मकतापत्तिर्दुवारेति भावः । अथवा 'व्यापारो भावना इत्यर्धेन व्यापारस्य धातुवाच्यत्वं संसाध्य जानाति करोतीत्यादेः केवलज्ञानयत्नादिक्रियामात्रवाचित्वं तार्किकाभ्युगतं करोति-कृञ इति। कृञादेर्व्यापारमात्रवाचकत्वे पूर्वोक्तरीत्या सकर्मकत्वव्यवहारोच्छेदापत्तिः। न च लक्षणया सकर्मकत्वव्यवहारो भविष्यतीति वाच्यम् गङ्गापदस्य तीरे भाक्तत्वेऽपि तत्र स्नानादिकार्याभावावबत् मुख्यसकर्मकत्वमादाय शास्त्रस्य चारितार्थ्ये गौणे तद्व्यापारे मानाभावेन कर्मणि लकारासम्भवात् । अत एवाह -

**किन्तूत्पादनमेवातः कर्मवत् स्याद् यगाद्यपि।**

**कर्मकर्त्तर्यन्यथा तु न भवेत् तद् दृशेरिव॥[16] इति।**

यतः कृञो यत्नमात्रमर्थो नेष्यते, अतः कर्मवत् स्यादिति पदेन "कर्मवत् कर्मणा तुल्यक्रियः" (पा.सू.३/१/८७) इति सूत्रं लक्ष्यते। अयमर्थः यत एवास्योत्पादनार्थकता, अतः पच्यते ओदनः स्वयमेवेतिवत् क्रियते घटः स्वयमेवेति यगादयोऽप्युपपद्यन्ते। अन्यथा यत्नस्य कर्मनिष्ठत्वाऽभावात् तन्न स्यात् दृशिवत् । यथा दृश्यते घटः स्वयमेवेति न दर्शनस्य घटावृतित्वात् तथा यत्नस्यापि इति तथा प्रयोगपत्तेरिति।

कृञादेरिव जानातीत्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचित्वात् 'क्रियते घटः स्वयमेवे' तिवत् 'ज्ञायते घटः स्वयमेव' 'ग्रामो गम्यते स्वयमेव' कथन्नेति तदुत्तरन्नाह –

**निर्वर्ध्यै च विकार्ये च कर्मवद्भाव इष्यते।**
**न तु प्राप्ये कर्मणीति सिद्धान्तोऽत्र व्यवस्थितः॥[17] इति।**

त्रिविधं हीप्सितकर्म-निवर्त्य, विकार्य, प्राप्यञ्च। तत्राद्ययोः निर्वर्त्ये विकार्ये च कर्मवद्भावो भवति नान्त्ये प्राप्ये । प्राप्ये-क्रिया कृतविशेषानुपलभ्यमानत्वात्।

निर्वर्त्ये- 'क्रियते घटः स्वयमेवे' त्यत्र घटस्योत्पत्तिरूपफलाश्रयत्ववदावरणभ ङ्गरूपफलाश्रयत्वस्य सत्त्वात् । 'अयं घटः केनचिद् दृष्टः, अयं ग्रामः केनचिद् गत इति कर्मदर्शनेनावगन्तुं न शक्यते। 'घटं करोति' इति निर्व] 'सोमं सुनोति' इति विकार्ये च तत्तत्कर्मदर्शनेनापि क्रियाकृतवैलक्षण्यं दृश्यते। अत्र मानं हि- 'कर्मवत् कर्मणा तुल्यक्रियः' इति सूत्रभाष्यम्। तत्र हि 'धातोरेकाच' इति सूत्रादनुवर्त्तमानधातुग्रहणेन धातुवाच्यक्रियया इत्यर्थलाभेन 'साध्वसिश्छिनत्ति' 'स्थाली पचति' इत्यादौ करणाधिकरणाभ्यां तुल्यक्रिये कर्तरि वस्तुतः सतोऽपि व्यापारस्य धातुवाच्यत्वाभावादेवानतिप्रसङ्गे कर्मग्रहणमतिरिच्यमानं कर्मस्थक्रियां लक्षयतीति सिद्धान्तः। कर्मस्थक्रियात्वञ्च प्राप्यभिन्नकर्मण्येव सम्भवतीत्याहनिर्व] च विकार्ये च इति।

धातूनां फलावाचकत्वे त्यजिगम्योः प-यतापत्तिः। क्रियावाचकत्वाविशेषात् । फलस्योपलक्षणत्वेऽप्येकक्रियाया एव पूर्वदेशविभागोत्तरदेश संयोगजनकत्वादुक्त दोषतादवस्थ्यमित्यपि वदन्ति। तस्मादावश्यकं सकर्मकाणां फलवाचकत्वम् । अकर्मकाणां तु तन्निर्विवादमेव। “भूसत्तायाम्” (भ्वा.ग.) इत्याद्यनुशासनाच्च । अत एव– “द्व्यर्थः पचिः” इति भाष्यं सङ्गच्छते इति।

ननु प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्यैव प्राधान्यमिति न्यायबलात् यः प्रत्ययार्थः स प्रधानमित्यर्थकस्तदागमे हि दृश्यते इति न्यायाच्च तिङ्वाच्यैव भावना। नापि सकर्मकत्वव्यवहारानुपपत्तिः, स्वयुक्ताख्यातार्थव्यापारव्यधिकरणफलवाचकत्वमिति स्वीकारात्। आख्यातार्थव्यापाराश्रयत्वञ्च कर्तृत्वं वाच्यम् इत्यादि वदन्तं मीमांसकम्मन्यं प्रत्याह तस्मात् करोतिर्धातोः स्याद्व्याख्यानं न त्वसौ तिङाम् । पक्ववान् कृतवान् पाकं किं कृतं पक्वमित्यपि।

'घटो भवती' त्यत्र न घटपदाद् द्वितीयापत्तिः। आख्यातार्थव्यापाराश्रयत्वेन घटस्य कर्तृत्वादिति मीमांसकोक्तं युक्तमिति चेन्न, गमनपदार्थसंयोगात्मकफलस्य ग्रामे सत्त्वात् 'ग्रामः संयोगवानि' तिवद् 'ग्रामो गमवानि' ति प्रयोगस्य प्रामाण्यापत्तेः। फलानुत्पाददशायां व्यापारसत्वे पाको भवति इति प्रयोगानुपपत्तेश्च विक्लित्तेरवर्तमानत्वात्। न च भावविहितल्युड्घञाद्यर्थव्यापारस्य ग्रामादौ बाधान्नोक्त दोष इति वाच्यम्, लः कर्मणी ति विहितकाख्यातस्य त्वन्मते व्यापारार्थकत्ववत् 'कर्त्तरि कृदिति विहितघञादीनामपि व्यापारार्थकत्वसम्भवाद् भावे' इति सूत्रवैयापत्तेः। पचतीत्यस्य पाकं करोतीति व्याख्यानमपि धातोरेव। किञ्च प्रक त्यर्थप्रकारकशाब्दबोधं प्रति विशेष्यतासम्बन्धेन तदुत्तरप्रत्ययज- न्योपस्थिति हेतुरिति कार्यकारणभावमूलकप्रकृतिप्रत्ययाविति न्यायस्य पक्वानित्यत्र पाकः कर्मकारकं, क्तवतु प्रत्ययार्थः कर्तृकारक, तयोश्चारूणाधिकरणोक्तरीत्या क्रियात्वमेव नहि कारकान्वयितावच्देदकमति सिद्धान्तेन चान्वयाभावाद् व्यभिचारः।

न च सम्बन्धमात्रमुक्तञ्च श्रुत्या धात्वर्थभावयोः तदेकांशनिवेशे तु व्यापारोऽस्या न विद्यते इति भट्टपादोक्तदिशा पाकसम्बन्धि कर्तेति बोधस्वीकारान्न व्यभिचार इति वाच्यम्, क्रियात्वाभावेन योग्यताविरहात्। अपि च यः प्रधानं स प्रत्ययार्थः यः प्रत्ययार्थः स प्रधानमेवेति नार्थः अजा, अश्वा, छागी इत्यत्र स्त्रीप्रत्ययार्थस्त्रीत्वस्यैव प्राधान्यापत्तेश्छाग्यादेरनापत्तेश्चा किन्तूत्सर्गोऽयम्। विशेष्यत्वादिना बोधस्तु तथा व्युत्पत्त्यनुरोधात्।

अत एव नैयायिकानां प्रथमान्तविशेष्यक एव बोधः । लक्षणायामालङ्कारिकाणां शक्यतावच्छेदकप्रकारक एव बोधो, न नैयायिकादीनाम्। घटः कर्मत्वमानयनं कृ तिरित्यादौ विपर्ययेणापि व्युत्पन्नानां नैयायिकनव्यादीनां बोधो, न तु तद्व्युत्पत्तिरहितानाम् । अन्येषां तन्निराकाङ्क्षमेवेत्यादिकं सङ्गच्छते।

अत एव 'प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वाद्' (पा.सू. १/२/५४) इत्याह भगवान् पाणिनिः। प्रधानं प्रत्ययार्थ इति वचनं न इत्यनुवर्त्य न कार्य्यम्, अर्थस्य–अर्थावबोधस्यान्यप्रमाणत्वाद् व्युत्यत्पत्त्यनुसारित्वादिति हि तदर्थः ।

एवं सत्यपि नियामकापेक्षणे च “भावप्रधानमाख्यातम्” इति वचनमेव गृह्यतामिति सुधीभिरूह्यम्।

**शब्दशक्ति प्रकाशिका कारमतेन धात्वर्थ विवेचनम्** - शब्दशक्तिप्रकाशिकायां धातुलक्षणं प्रतिपादयन् ग्रन्थकारः नामधातुभेदात् धातुं निरूपयति -

**यो यत्स्वार्थस्योत्तरस्थतृजर्थे बोधनक्षमः ।**
**स तादृशार्थकः शब्दो धातुस्त्रिविध ईरितः॥[18] इति।**

अस्याशयः-यः शब्दः स्वार्थप्रकारकस्वोत्तरतृजाद्यर्थमुख्यविशेष्यकान्वयबोधे हेतुः स धातुर्मूलधातुसौत्रप्रत्ययान्तेतिभेदास्त्रिविध इति कारिकार्थः। यः शब्दः स्वोत्तरतृचः शक्याऽर्थे स्वोपस्थाप्यस्य यादृशार्थस्यान्वयबोधं प्रति समर्थः स तादृशार्थे धातुरुच्यते। 'पच–पिपक्षा' दयो हि शब्दाः 'पक्तृ पिपक्षित्रा' दिनामनिविष्टाः स्वोत्तरतृजर्थे कादौ स्वोपस्थाप्यानां 'पचन-पाकेच्छा' दीनामन्वयधियं प्रतिप्रभवो, न त्वन्ये घटाद्याः।

स चायं मूलधातुः सौत्र प्रत्ययान्तश्चेति त्रिविध इति। प्राचीनमतमुत्थापयन् सुबर्थेऽपि धात्वर्थस्यान्वयवादिनां मते धातुं लक्षयति -

**यः सुबर्थे निजार्थस्य स्वान्ते कृच्चिन्तनं विना।**
**यादृशस्यान्वयाहेतुः स वा धातुस्तदर्थकः॥[19] इति।**

यः शब्दः स्वान्ते कृच्चिन्तनं विना सुबर्थे यादृशस्य निजार्थस्यान्वयधियं प्रत्यसमर्थः स एव तादृशार्थको धातुः। 'पाकं कुरु, सम्पदं पश्ये' त्यादौ हि पचादिको धातुः स्वोत्तरस्य भावकृतः प्रतिसन्धानदशायामेव सुबर्थकर्मत्वादौ स्वार्थस्य पचनादेरन्वयबोधमाधत्ते न त्वन्यथा, स्वरूपस्य घञाद्यशक्यत्वेन तत्र धात्वर्थस्यान्वयायोगादिति प्राञ्चः।

धातोर्विधात्रयलक्षणं प्रतिपादयन् कथयति ग्रन्थकारः -

**मूलधातुर्गणोक्तोऽसौ, सौत्रः सूत्रैकदर्शितः।**
**योगलभ्यार्थको धातुः प्रत्ययान्तः प्रकीर्तितः॥[20] इति। ट**

गणोक्तो गणपठितः 'भू' प्रभृतिः, सौत्रः सूत्रमात्रोपात्तः 'स्कन्-जु प्रभृतिकः, योगलभ्यार्थकः स्वावयलभ्यार्थस्य बोधकः 'पचि-पिपक्षादिः तितिक्षा' दिरपि सनर्थस्वरूपाद्यन्तर्भावण यौगिक एव। 'हिन्दोलान्दोलादेलौकिकस्यापि सत्त्वाच्चतुर्विध एव धातुरिति वोपदेव। सौत्रपदं यौगिकगणोक्ताभ्यामन्यतरपरमतो लौकिकस्य नाधिकयमित्यन्ये।

व्युत्पत्तिवैशद्याय धातोरन्यविधविधात्रयं दर्शयितुं परस्मैपदित्वादिभेदेनापि त्रैविध्यं सम्भवति अतस्तदपि निर्वक्ति

**यो यत्पदार्थकर्तृत्वे यादृस्वार्थस्य बोधकः ।**
**स तत्पदीभवेद्धातुस्तादृशः स्वार्थबोधने॥[21] इति।**

यो धातुः स्वोपस्थाप्यस्य यादृशार्थस्य यत्पदोपस्थाप्ये कर्तृतवेऽन्वयबोधं प्रति समर्थः स धातुस्तत्पदी।

'गम भू' प्रभृतयः स्वार्थस्य गत्युत्पत्तिप्रभृतेर्मुख्ये गौणे वा परस्मैपदार्थे एव कर्तृत्वेऽन्वयधियं प्रतिप्रभवः । सत्यपि योग्यतादिग्रहे 'चैत्रो गच्छति, भवति' इत्यादित इव गच्छते भवते' प्रभृतिभ्यो गतिकर्तृतवाद्यप्रतीतेः। 'सङ्गच्छते, भवते' इत्यादितः सङ्गति प्राप्त्यादिकर्तृतवावगमात्तादृशार्थे आत्मनेपदिन एव ते। 'यजति' करोतीत्यादित इव 'यजते, कुरुते' इत्यादितोऽपि यागादिकर्तृतवस्यावगतेर्यागाद्यर्थे यजिकृञादिरुभयपदी। तदुक्तमभियुक्तैः -

**पदद्वयेन साकाङ्क्षाः स्वरिञिण्ण्यन्तधातवः |**
**टसनन्ताः प्रायशो मूलधातुवत्पदिनो मताः॥**
**क्यङ्-यङन्ता ङानुबन्धा रुचाद्याश्चात्मनेपदैः ।**

परे परस्मैपदिनो नित्यं कर्तरि धातवः ॥इति॥

स्वरितः समाहारस्वरानुबन्धा 'यज-पचाद्याः, जितोञ्यनुबन्धाः 'कृअसुञा' दयो, ण्यन्ताश्च भावि' प्रभृतयः कर्तृत्ववाचिना पदद्वयेन समं साकाङ्क्षाः। सनान्तास्तु स्वप्रकृतिपदभाजस्तेन 'बुभूषते, विवर्द्धिषति' इत्यादिको न प्रयोगः। 'स्मृदृशोः परस्मैपदित्वेऽपि सनन्तयोस्तयोरात्मनेपदित्वमेव, अत उक्तं। प्रायश इति । क्यङन्ता 'हंसाया' द्याः, यङन्ता 'बोभूया' द्याः ङानुबन्धाः 'शीङा' द्याः, "रुचा' दिगणश्च कर्तृत्ववाचिनात्मनेपदेनैव साकाङ्क्षाः। परे पुनर्धातवः परस्मैपदेनैवेत्यर्थः ।

प्रत्ययोऽसौ चतुर्विध इति यदुक्तं तस्य चतस्रो विधादर्शयतिविभक्तिश्चैव धात्वंश स्तद्धितं कृदिति क्रमात्। चतुर्धा प्रत्ययः प्रोक्तः, कादिभिः पञ्चधाऽथवा धात्वंशः 'सन् क्यजा' दिः। 'वत्सकोऽश्वक' इत्यादौ दयाकुत्साद्यर्थकस्य कादेः, 'अजा ब्राह्मणी श्वश्रूरि त्यादौ स्त्रीत्वाद्यर्थकटाबादेश्च तद्धितत्वोपगमे चतुर्विध एव प्रत्ययः, तदनुपगमे तु पञ्चविध एव। अत एव 'अवश्कभार्य' इत्यादौ पुंवद्भावस्तद्धितकृतोरेव कोपधस्य तन्निषेधात् एवं 'औपगव' इत्यादाविव 'पट्वी त्यादौ नौत्वादिरिति कालापाः ।

**धात्वर्थ विचारसारः निरुपणम्** – अस्मिन् प्रकरणे धातुलक्षणम्, धातुभेदः, क्रियालक्षणम्, क्रियाभेदः इत्यादयो विषयाः विमृष्टाः सन्ति। तत्र शब्दशक्तिप्रकाशिकाकारेण धातोर्लक्षणं व्याहरता प्रत्यपादि यत् यः स्वोत्तरप्रयुक्ततृजादिप्रत्ययानाम् अर्थबोधने सक्षमः स धातुः कथ्यते। एतेन इदं सिद्ध्यति यत्, केवलस्य तृजादिप्रत्ययस्यार्थबोधने सामर्थ्यं नास्ति मतस्यास्य परिपुष्टिस्तु भगवता पतञ्जलिवाक्येनापि भवति तथा हि उक्तं महाभाष्ये-कृत्तद्धितान्तञ्चैवार्थवन्न केवलाः कृतस्तद्धिता वा।[22]

धातुभेदविषयेऽपि शब्दशक्तिप्रकाशिकाकारः "धातुस्त्रिविधः ईरितः" इति प्रोक्तवान्। तत्र भ्वादिगणपठिता धातवः शुद्धधातवः, सनादिप्रत्ययान्ता प्रत्ययान्तधातवः, जृस्तम्भूप्रवृत्तय सौत्रधातवः कथ्यन्ते ।

भूषणसारकर्ता कौण्डभट्टस्तु भट्टोजिदीक्षितस्य शब्दकौस्तुभोक्तं मतं समुद्धृत्य भर्तृहरिवचनेन तन्मतं परिपुष्यन् धातोः अर्थं तदुत्तरवर्तिनः तिङः अर्थ, तयोः सम्बन्धं च सप्रमाणं सर्वं व्याख्याय भाष्यवचनेन समपुषत् । तथा हि उक्तं तेन वैयाकरणभूषणसारे

**"फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।**

**फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्"।।**[23]

अस्याः कारिकायाः अर्थ फलव्यापारोभयनिरूपितवाचकातावान् धातुः । फलाश्रय व्यापाराश्रयोभयनिरूपितवाचकतावतन्तस्तिङः। फलोत्पत्तौ व्यापारस्य प्राधान्यं तिङर्थस्तु फलव्यापारयोर्विशेषणीभूतम्। अस्याः कारिकायाः अनुसारं फलव्यापारौ धातुवाच्यौ आश्रयस्तिवाच्यः। तत्र फलाश्रयः फलस्य विशेषणीभूतः, व्यापाराश्रयश्च व्यापारस्य विशेषणीभूतः, तिङर्थः सङ्ख्याकर्तृप्रत्ययस्थले कर्तर्यन्वेति कर्मप्रत्ययस्थले च कर्मण्यन्वेति। प्राचीनवैयाकरणमते तिङन्तकृदन्तोभयस्थले धात्वर्थव्यापारस्यैव प्राधान्यम्। परञ्च नागेशमतेन कृदन्तस्थले कर्मप्रत्ययस्थले धात्वर्थफलस्यैव प्राधान्यमिति विशेषः। तिङर्थकालस्तु कर्तृकर्मोभयप्रत्ययस्थले धात्वर्थव्यापारस्यैव विशेषणीभूतम्। अन्यथा अतीतभावनाके विद्यमाने कर्तरि 'पचति' इति प्रयोगापत्तिः। किञ्च पाकानारभ्य दशायामपि कर्तुर्विद्यमानत्वात 'पचति इति प्रयोगापत्तिः। इत्थं प्राचीनवैयाकरणमतानुसारं "चैत्रः तण्डुलं पचति' इत्यादिवाक्याद् एकत्वाभिन्नचैत्रकर्तृकतण्डुलकर्मकवर्तमानकालिक विक्लित्यनुकूलो व्यापारः इति शाब्दबोधो जायते। "चैत्रेण तण्डुलः पच्यते" इत्यादावपि एकत्वाभिन्नचैत्रकर्तृवृत्तितण्डुलकर्मकवर्तमानकालिकविक्लित्यनु कूल व्यापारजन्यतण्डुलश्रयिका विक्लित्तिः इति शाब्दबोधः। तथा च कृदन्तस्थले अपि 'रामेण बाणेन हतो बाली' इत्यत्र रामकर्तृवृत्तिबाणकरणकभूतकालिकप्राणावियोगाश्रयो बालीः इति शाब्दबोधः भवति। कर्तृकर्मणोराख्यातार्थत्वे मानं तु लः कर्मणि चः भावे चाऽकर्मकेभ्यः इति सूत्रमेव। सकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि कर्मणि च विधीयन्ते, अकर्मकेभ्यो धातुभ्यो लकाराः कर्तरि भावे च विधीयन्ते इति सूत्रार्थः ।

नैयायिकमते यद्यपि धातोः अर्थः फलव्यापारावेव तथापि तिङर्थः कृतिः एव। ल कर्मणि- इत्यादिसूत्रे कर्तृपदं कर्तृत्वपरं कर्मपदञ्च कर्मत्वपदमिति । परञ्च वैयाकरणाः एतन्निराकुर्वन्ति यतो हि कर्तृत्वं तु कृतिरेव कृतिर्यत्नः। स च धातुवाच्यत्वेन उक्तत्वात् न तत्र तिर्थे शक्तिः अनन्यलभ्यो हि शब्दार्थः इति न्यायात्। किञ्च तिप्रत्ययस्य कर्तरि कर्मणि च शक्तिः । यतोहि "लः कर्मणि च भावे चाऽकर्मकेभ्यः" इति सूत्रे कर्तरि कृत् इत्यतः कर्तरि पदमनुकृष्यते। अतः 'कर्तरि कृत' इत्यत्र प्रयुक्तस्य कर्तृपदस्य कर्तरि शक्तिः स्वीकृतत्वात्। तस्यैव पदस्य अनुकृष्यमानस्य 'लः कर्मणी० ति सूत्रे कथं कर्तृत्वपरं स्वीकर्तुं शक्यते न हि 'गोधाः सर्पन्ति' सर्पणाच्च अहिर्भवति इति न्यायात्। किञ्च नैयायिकमते शाब्दबोधे प्रथमान्तार्थपदार्थस्यैव प्राधान्यात् "भुक्त्वा देवदत्तो व्रजति" इत्यादिवाक्ये 'क्त्वा' प्रत्ययान्तस्य प्राधान्यव्यावर्तनाय इतरविशेषणाघटितत्त्वं प्रथमान्तपदप्राधान्यमिति योजनीयं भवति इत्यपि गौरवम्।

मीमांसकमतेन फलमात्रं धात्वर्थः । तिर्थस्तु भावना कर्तुः बोधः आक्षेपात्। परञ्च एषां मतेन सकर्मकाकर्मकव्यवस्थायाः उच्छेदः स्यात् यतोहि फलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम् । फलव्यधिकरणव्यापारवाचकत्वं सकर्मकत्वञ्च । एतस्य लक्षणस्य सङ्गतिस्धात्वर्थफलव्यापारोभयनिरूपितायां सम्भवति। अतः एतन्मतमपि वैयाकरणैः त्यज्यते। भूषणसारमतानुसारं क्रिया हि द्विधा भवति साध्या, सिद्धा च। तत्र क्रियान्तराकाङ्क्षाऽनुत्थापकतावच्छेदकत्वं साध्यत्वम् । तदभिन्नत्वं सिद्धत्वं च।

तदुक्तं वैयाकरणभूषणसारे -

**साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना।**
**सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः ।।**[24] **इति**

अर्थात् 'पचति' पक्ष्यति इत्यादौ पाकान्या क्रिया या आकाङ्क्षायाः अनुत्थापकतावच्छेदकत्वात् साध्यत्वम् । पाकः इत्यादौ पाकान्यास्ति क्रियायाः आकांक्षोदयात् सिध्यत्वम् । पाकः अस्ति भवति वा इति । यद्यपि पचति' इत्यत्र व्यापार: फूत्कारत्व अधः सन्तापनत्वादि अनेकविधस्तथापि तेषां सर्वेषामपि एकत्रानुस्यूतत्वादभेदत्वाच्च एकैव क्रियेति व्यवहारः। अतः नात्र नानार्थकतापत्तिः ।

### सन्दर्भग्रन्था


1. वाक्यपदीयम् तृतीयकाण्डम् क्रियासमुद्देशः कारिका - २०
2. वाक्यपदीयम् तृतीयकाण्डम् साधनसमुद्देशः कारिका – ५८
3. वाक्यपदीयम तृतीयकाण्डम् क्रियासमुद्देशः कारिका – ४
4. वाक्यपदीयम तृतीयकाण्डम् क्रियासमुद्देशः कारिका - ०१
5. वाक्यपदीयम् कालसमुद्देशः कारिका
6. शब्दशक्तिप्रकाशिका धात्वर्थ- ५८
7. वाक्यपदीयम् कारिका
8. वैयाकरणभूषणसारः धात्वर्थनिर्णये कारिका - १४

9. वैयाकरणभूषणसारः धात्वाख्यातार्थनिर्णये कारिका - १५
10. वाक्यपदीयम द्वितीयकाण्डम् - १८३
11. वैयाकरणभूषणसार कारिका - १३
12. वैयाकरणभूषणसारः कारिका - ०१
13. वैयाकरणभूषणसारः कारिका - ३
14. वैयाकरणभूषणसार धात्वर्थ कारिका - ४
15. वैयाकरणभूषणसार धात्वर्थ कारिका -५
16. वैयाकरणभूषणसार कारिका - ०६
17. वैयाकरणभूषणसार कारिका - ०७
18. शब्दशक्तिप्रकाशिका कारिका - ५६
19. शब्दशक्तिप्रकाशिका कारिका - ५७
20. शब्दशक्तिप्रकाशिका कारिका -५८
21. शब्दशक्तिप्रकाशिका कारिका -५६
22. ''कृत्तद्धितसमासाश्च' इति सूत्रमहाभाष्ये, लघुशब्देन्दुशेखरे च।
23. वैयाकरणभूषणसारधात्वर्थनिर्णयकारिका-2
24. वैयाकरणभूषणसारः कारिका सं. 15
25. वाक्यपदीयम् क्रियासमुदेशः कारिका-04